आशीर्वादाः

[illegible] २३६

११ पत्राणि

काव्य

वे. २३६५
आशीर्वादमन्त्र:
आशीर्वाद काव्य
२००

आशीर्वादमन्त्र

२००

॥श्रीगणेशाय नमः॥श्रीसीतारामचंद्राभ्यां नमः॥श्रीहनुमते नमः॥ ॥आशीर्वाद लिख्यते॥
॥ ॥ॐ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग्भग
।गो नो बृहद्वदेम विदथे सुवीराः॥ सा ते प्रति दुह्यां वरं जरित्रे वरो वरयितव्यो भवति। जरिता ग
रिता दक्षिणा मघोनी मघवती मघमिति धननामधेयं महते दानकर्मणे दक्षिणा दक्षतेः स
मर्द्धयतिकर्मणो व्यृद्धं नमर्द्धयतीति सपिवा प्रदक्षिणागमनाद्दिशामभिप्रेत्य दिग्घस्तप्रकृति दक्षि
णो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्हनने देहि स्तोतृभ्यः
कामान्मास्मानतिदंहीर्मास्मानतिहाय दा भगो नोऽस्तु बृहद्वदेम स्वे वेदने भगो भजतेर्बृहदि
ति महतो नामधेयं परिवृढं भवति वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यमित्रान्वेतेर्वा स्याद्गति १

कर्मणो वीरयते वा सीमिति परिग्रहार्थीयो वा पदपूरणो वा । प्रसीमादित्यो असृजत् । प्रासृजदिति वा । प्रा
सृजत्सर्वत इति वा । वि सीमतः सुरुचो वेन आवरिति च । व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः
सुरोचनादपि वा सीमेत्येतदनर्थकमुपबंधमाददीत पंचमीकर्मणां सीम्नः सीमतः सीमातो मर्यादातः
सीमा मर्यादा विसीव्यति देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्धनामेत्येके । १ । ऋचां त्वः
पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मीमित
उ त्वः । इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनीयः गायत्रमेको गायति शा
क्वरीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमि
ति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः श्रुततो ब्रह्म

परिवृहं सर्वतो यज्ञस्य मात्रां विमिमीते। कोध्वर्युर्ध्वरयुर्ध्वर्युर्ध्वरं युनक्ति ध्वरस्य नेता ध्वरं कामयत इति वापि
वाधीयाने युरुपबंधो ध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथमनुदात्तप्रकृति
नाम स्याद्दृष्टव्ययं तु भवति। उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायामुतो त्वस्मै तन्वं विसस्र इति चतु
र्थ्यामथापि प्रथमाबहुवचने॥२॥ अक्षण्वंतः कर्णवंतः सखायो मनोजवेष्वसमा बभूवुः॥ आदघ्नास उ
पकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृश्रे। अक्षिमंतः कर्णवंतोक्षि चष्टेरनक्तेरित्याग्रायणस्तस्मादेते व्यक्त
तरे इव भवत इति ह विज्ञायते कर्णः कृंततेर्निकृंतद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छंतीव खे उदगंता
मिति ह विज्ञायते मनसां प्रजवेषु। असमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपर आस्यमस्यतेरास्यंदत
एनदन्नमिति वा दघ्नं दध्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति प्रस्नेया ह्रदा इवैके प्रस्ने ॥२॥

यादृशीरेतानाहीहतो ह्रादते: शाब्दकर्मणो ह्रादते वीस्याशीती भाव कर्मणो यापि समुच्चयार्थे भवति।३। सक्तु
मिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि
वाचि । सक्तुमिव परिपवनेन पुनंतः सक्तु सचते दुर्धावो भवति कसतेर्वा स्याद्विपरितस्य विकसितो भवति । य
त्र धीरा मनसा वाचम‒षत प्रज्ञानेन धीराः प्रज्ञानवंतो ध्यानवंतस्तत्र सखायः सख्यानि संजानते भद्रैषां लक्ष्मी
र्निहिताधि वाचीति भद्रं भगेन व्याख्यातं भजनीयं भूतानामभिद्रवणीयं भवद्रमयतीति वा भाजनवद्वा ल
क्ष्मीर्लाभाद्वा लक्षणाद्वा लंघनाद्वा लषतेर्वा स्यात् श्लेषाकर्मणो लग्यतेर्वा स्यादाश्लेषकर्मणो लज्जतेर्वा स्या
दश्लाघाकर्मणः शिप्रे उत्यपरिशिष्टाख्यास्यामः।४। तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततं संज
भार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै । तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां

क्रियमाणानां वितनं संह्रियते यदसावयुक्त हरणानादित्यरश्मीन्हरितो यानिति वा । अथ रात्रीव वासस्तनुते ।
सिमस्मैवे सरमहर वयुवती सर्वस्मादपि वोपमार्थे स्यात् रात्रीव वासस्तनुवतेति तथापि निगमो भवति । पुनः
समव्यद्विततं वयंती समतान्सीत् । पू । दिवानो यथासदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे । दिवादेवा नो ।
यथा सदा वर्द्धनाय स्युः अप्रायुवो अप्रमाद्यन्तो रक्षितारश्चाहन्यहनि । च्यवन ऋषिर्भवति च्यावयिता स्तोमानां
च्यवानमित्यप्यस्य निगमा भवंति । युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । युवं च्यवनं स
नयं पुराणं यथा रथं पुनर्युवानं चरणाय तक्षथुः युवा प्रयौति कर्माणि तक्षतिः करोतिकर्मा । रजो रजते ।
उत्तर ज्योती रज उच्यते उदकं रज उच्यते लोका रजांस्युच्यन्ते असृगहनी रजसी उच्येते । हरो हर इति ज्योतिर्हर उच्यते उदकं
हर उच्यते लोका हरांस्युच्यन्ते । जुहुरे विचितयंतः । जुहूरे विचेतयमाना यंतउत्सेषा नेककर्मा । पर्वदेवस्य नम ।।३।।

साम्यं त इति पश्यतिकर्मा। वीहि शूर पुरोडाशमिति खादतिकर्मा। वीतं पातं पयस उस्रियायाः। अश्नीतं पिबत
पयस उस्रियायाः उस्रियेति गोनाम उस्राविणोऽस्यां भोगाः। तामिंद्रं मतिभिः सुतेभिः सुनीथासो वसूयवः। गोभिः।
क्राणा अनूषत। गोभिः कुर्वाणा अस्तोषत। दीमुदेवो अति वरुणाय स्यते सप्त सिंधवः। अनु क्षरंति काकु
दं सूर्म्यं सुषिरामिव। सुदेव स्त्वं कल्याणदानो यस्य तव देव सप्त सिंधवः प्राणाय अनुक्षरंति काकुदं। सूर्म्यं
सुषिरामिवेत्यपि निगमो भवति। ७। प्र वां वृञ्जे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते। विशामक्तोरुषसः पू
र्वहूतौ वायुः पूषा स्वस्तये नियुत्वान्। प्रवृज्यते सुप्रायणं बर्हिरेषामेयाते सर्वस्य पातारौ पालयितारौ वा बी
रिटमंतरिक्षं भियो वा भासो वा ततिरपि वोपमार्थे स्यात् सर्वपती इव राजानौ बीरिटे गणे मनुष्याणां रात्र्या वि
वासे पूर्वस्यामभिहूतौ वायुश्च नियुत्वान् पूषा च स्वस्त्ययनाय नियुत्वान्नियुतोऽस्याश्वा नियुतो नियमनाद्वा

नियोजनाद्वाघ्राणेराम्मुमिति घ्राणकपूरणः परिसीमिति व्याख्यातमेनमेनामस्यास्यसैतेव्याख्यातंसृणिरंकु
शोभवतिसरणादंकुशोंऽचतेराकुञ्चितोभवतीतिवा। नेदीयद्धसरण्यःपद्भुमेयाद्दिस्यपिनिगमोभवति
(त)कमसंकुशादायास्पद्भुमोषधमागछतिस्थागच्छितिति।८। हिमेनाग्निंघ्रंसमवारयेथांपितुमतीमूर्जमस्मा
अधत्तं। सबीसेभ्यत्रिमश्विनावनीतमुन्निन्यथुःसर्वगणंस्वस्ति। हिमेनोदकेनग्रीष्मांतेग्निंघ्रंसमहरवा
थं। मन्नवतींवाचास्माऊर्जमधत्तमग्नयेयोयमृबीसेपृथिव्यामग्निरंतरोषधिवनस्पत्यप्सुमुन्निन्यथुःसर्व
गणंसर्वनामानंगणोगणनाकुणस्त्वयदृष्ट्वषधयउघंतिप्राणिनश्चपृथिव्यांतदश्विनोकर्म तेने॥ ने
स्तौतिस्तौति।९। संवत्सरंशशयानाब्राह्मणाव्रतचारिणः। वाचंपर्जन्यजिन्वितांप्रमंडूकाअवादिषुः॥ ॥५॥
संवत्सरंशशयानाब्राह्मणाव्रतचारिणोब्रुवाणादपिवोपमार्थेस्याद्ब्राह्मणाइवव्रतचारिणइति।

वाचंपर्जन्यप्रीतांप्रावादिषुर्मडूकावसिष्ठोवर्षकामः पर्जन्यंतुष्टावंतंमंडूकाअन्वमोदंतसमंडूकामननमोद
मानांदृष्ट्वातुष्टावदामिवादिन्येषगर्भवति॥१०॥नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रंभागंदे
वेभ्योविदधात्यायमूचंद्रमास्तिरतेदीर्घमायुः॥नवोनवोभवतिजायमानद्वतिपूर्वपक्षादिमभिप्रेत्या
ह्नांकेतुरुषसामेत्यग्रमित्यपरपक्षांतमभिप्रेत्यादित्यदैवतोद्वितीयःपाददत्येकेभागंदेवेभ्योविदधा
त्यायन्नित्यर्द्धमासेज्यामभिप्रेत्यप्रवद्धयतेचंद्रमायुर्मृत्युमीरयतीतिसतोमृतेत्यावयतीतिज्ञातव
त्याक्षोमौरूत्यस्तस्यैषाभवति॥११॥प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूवायत्कामास्ते
जुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणामितसाशीरहिव्यीरव्यातस्तस्यैषाभवति॥१२॥धन्वनागा
धन्वनाजिंजयेमधन्वनातीव्राःसमदोजयेम।धनुःशत्रोरपकामंकृणोतिधन्वनासर्वाःप्रदिशोजये

मा। इति सांनिगद्यास्मातासमदः समदो वान्तेः समदो वामदन्ते ग्र्यौज्जयन्ते वीजिनान्तेवीप्रवयन्तीषु। निति
वान्तस्याएषाम्नवति।१३। वक्ष्यंतीवेदागनीगंन्तिकर्णं प्रियंसखायं परिषस्वजाना। योषेवशिंक्ते वितता
धि धन्वंज्याइयंसमनेपारयंती। वक्ष्यंतीवागच्छतीकर्णं प्रियमिवसखायमिषुंपरिष्वजमाना योषेव
शब्दं करोति विततधिधनुषिज्येयं समनं संग्राममपारयंती बूरीषतेर्गतिकर्मणस्तस्यैषाम्नवति।१४।
कनिक्रदज्जनुषंप्रब्रुवाणइयर्त्तिवाचमरितेवनावं। सुमंगलश्चशकुनेभवासिमा त्वाकाचिदभाभावा
श्व्याविदत्। अन्यक्रंदीजन्मप्रब्रुवाणोयथाशब्दस्तथानामेरयतिवाचमीरयीतेवनावंसुमंगलश्चश
कुनेभवकल्याणमंगलोमंगलंगिरतेर्गिलतसर्थेगिरत्यनर्थानितिवांगलमंगलवन्मज्जयतिपाप
कमितिनैरुक्तामांगलत्वितिवामाचत्वाकाचिदभिभूतिः सर्वतोविदत्कृत्समर्थमन्युत्थितंकपिं ।।५।।

जतो भिमवाशेत दग्नि वाऽदन्ये षर्म्भवति ।१५। भद्रं व द दक्षिणतो भद्रमुत्तरतो वदा भद्रंपुर स्तान्नो वदभ द्रंप
श्चात्कपिंजल। इति सा निगदव्याख्याता। गृत्समदो गृत्सोमदनो गृत्स इति मेधाविनाम गृणाते: स्तुतिकर्मणो म
हूकामञ्जूकामज्जनान्मदतेर्वा मोदतिकर्मणो मंदतेर्वा तृप्तिकर्मणो मंडनेरिति वैयाकरणा मंड एषामोक इ
ति वा मंडो मदेर्वा मुदेर्वा तेषामेषा भवति ।१६। प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतं हविषो दत्त भागं। घृ
तं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः। तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वंतो हविषः स
न्तु भागाः। तवाग्ने यज्ञो ३ यमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः। आग्नेया वै प्रयाजा आग्नेया अनुयाजा
इति च ब्राह्मणं छंदोदेवता इत्यपरं छंदांसि वै प्रयाजाश्छंदांस्यनुयाजा इति च ब्राह्मणमृतुदेवता इत्य
परमृतवो वै प्रजायाः पशवोनुयाजा इति च ब्राह्मणं प्राणदेवता इत्यपरं प्राणा वै प्रयाजा अपाना अनुया

6 ज्ञा इति च ब्राह्मणमात्म देवता उस परमात्मा वैप्रयाज्ञाः प्रज्ञाः नुयाज्ञा इति च ब्राह्मणमाग्नेयां इति तु ष्ठितिनि
ग्निमात्रमितरत्किमर्थं पुनरिदमुच्यते यस्मै देवतायै हविर्गृहीतं स्यात्तां मनसाध्यायेद्वषट्करिष्यन्नि ।
ति ह विज्ञायते तान्येतान्येकादशाप्रीसूक्तानि तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गात्समदमिति नाराशंसवं
ति मेधातिथं दैर्घतमसं प्रैषिकमित्युभयवंत्यतो न्यानि तनूनपंत्वंति तनूनपात्वंति । १७ । द्रविणोदा द्रविण
सो ग्रावहस्तासो अध्वरे । यज्ञेषु देवमीळते । द्रविणोदाय स्वे द्रविणस इति द्रविणसादिन इति वा द्र
विणसानिन इति वा द्रविणसस्तस्मात्सिदतीति वा । यज्ञेषु देवमीळते । याचंति स्तुवंति वर्द्धयंति पूजयंती ९
ति वा को द्रविणोदा उह इति क्रौष्टुकिः सबलधनयो र्दातृतमस्तस्य च सर्वा बलकृतिरोजसो जातमुत मन्य
एनमिति चाहाथाप्यग्निं द्राविणोदसमाहैष पुनरेतस्माज्जायते । यो अश्मनोरंतरग्निं जजाने सपिनिग

त्व या

मोभवस्यथाघ्नुजेषु द्राविणोदसाः प्रवादाभवंतितेषांपुनः पात्रस्थं द्रपानमितिभवत्यथाथ्वेतंसोमपा
नेनस्तौधृपाप्याहद्रविणोदाः पिबतु द्राविणोदसइति।१८।समिधोअ्रद्यमनुषोदुरोणेदेवोदेवान्य
जसिजातवेदः।आचवहमित्रमहश्चिकित्वांत्वंदूतःकविरासिप्रचेताः।समिद्धोअ्रद्यमनुष्यस्यमनुष्य
स्यगृहेदेवोदेवान्यजसिजातवेदआचवहमित्रमहश्चिकित्वांश्चेतनावांस्त्वंदूतःकविरसिप्रवृद्ध
चेतायज्ञेध्मइतिकाथ्क्योग्निरितिशांकपूणिस्तनूनपान्नपादित्यननंतरायाः प्रजायानामधेयंनि
र्णीततमाभवतिगौरत्रतनूरुच्यतेततस्यांभोगास्तस्याःपयोजायतेपयसआज्यंजायतेरितिशा
कपूणिरापोत्रतनूरुच्यन्तेततान्तरिक्षेताभ्यओषधिवनस्पतयोजायंतओषधिवनस्पतिभ्यएषजा
यतेतस्यैषाभवति।१९।तनूनपासथऋतस्ययानान्मध्वासमंजन्त्स्वदयासुजिह्वामन्मानिधीभिरुत

यज्ञमृंधन्देवत्राचकृणुह्यध्वरंनः। तनूनपात्पथऋतस्ययानान्यज्ञस्ययानान्मधुनासमंजन्स्वदयकल्याण
जिह्व मन्मानिचनो धीभिर्यज्ञंइच समर्धय देवान्नोयज्ञंगमयनराधं सोयज्ञं इति कास्थक्योनसआसि
न्वासीनाः शंसं स्वग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति तस्यैषा भवति।२०। अग्ने वो होतुस्त्वं रथं ह
सनामुपमंत्रिणः। शोयोरोमएवंत्तो भद्रो वारिन्मं इूकउ वंती ज्रायेदो परिस्रवः। अग्ने वो होतुस्त्वं वो हो
सुत्वमिति कल्याणनाम कल्याणं पुण्यं सुहितं भवति मानो व्याख्यातस्तस्यैषा भवति।२१। मानो मित्रो
५ वरुणोअर्यमायुरिंद्रऋभुक्षा मरुतः परिख्यन्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वी
र्याणि। यद्वाजिनो देवजातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि मानस्त्वं मित्रश्च
वरुणश्चार्यमा चायुश्च वायुरयन इंद्रश्चोरुक्षयण ऋभूणां राजेति वा मरुतश्च परिख्यं छकुर्वि:

शक्नोसुन्नेतुमानं शक्नोति तद्दितुमितिवा शक्नोति तत्किंतुमितिवा सर्वतः शंकरोऽस्त्विति वा शक्नोतेवीत
स्यैषा भवति ॥२२॥ वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीत
यस्वास्थाता ते जयतु तेत्वानि। वनस्पते दृहांगो हि भवास्मत्सखा प्रतरणः सुवीरः कल्याणवीरो गोभिः
सन्नद्धो असि वीलयस्वेति संस्तंभस्वास्थाता ते जयतु जेतव्यानि दुंदुभिरिति शब्दानुकरणं द्रुमो भि
न्न उतिवा दुंदुम्यतेर्वा स्याद्धकर्मणः तस्यैषा भवति ॥२३॥ उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते म
नुतां विष्ठितं जगत्। स दुंदुभे सजूरिंद्रेण देवैर्दूराद्दवीयो अपसेध शत्रून्॥ उपश्वासय पृथिवीं च दिवं
च बहुधा ते घोषं मन्यतां विष्ठितं स्थावरं जंगमं च यत् स दुंदुभे सहजोषण इंद्रेण च देवैश्च दूराद्दूरतर
मपसेध शत्रून्। इषुधिरिषूणां निधानं तस्यैषा भवति ॥२४॥ बहूनां पिता बहुरस्य पुत्रश्चिश्चा सणो

४८ त्ति सम नाव गस। इषुधिः शंकाः पृतनाश्च सर्वाः पृष्टो निनद्धो जयति प्रसूतः। बह्वीनां पिता बहुरस्य पुत्र इ
तीषून्निभिप्रेत्य प्रस्मयत इति वा बध्रीयमाणशब्दानुकरणं वा शंकाः सचन्ते सम्पूर्वो वा विकरन्तेः पृष्ठे निनद्धो
जयति प्रसूत इति व्याख्यातं हस्तघ्नो हन्यते तस्यैषा भवति। २५। शतं जीव शरदो वर्द्धमानः शतं हेमंतान्
छतमु वसंतान्। शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः। शतं जीव शरदो वर्द्धमान
इत्यपि निगमो भवति। शतमिति शतं दीर्घमायुर्मरुतो मां शतमेव मात्मानं भवति शतमिति शतं दीर्घमायुः॥२६॥ ८
इत्याशीर्वादः समाप्तः॥ ॥ ॥त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्।
त्र्यंबको रुद्रस्तं त्र्यंबकं यजामहे सुगंधिं सुसुगंधिं पुष्टिवर्द्धनं पुष्टिकारमिति वो र्वारुकमिव बंधनादारोहनात्मृ
त्योः सकाशान्मुंचस्व मां कस्मादित्येषामितरेषा भवति॥२७॥ जातवेदसे सुनवाम सोममरातीयतो निदहा
न

वेदः सनः पर्षतिदुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः। जातवेदस मिति जातवेदं सर्वं सचराचरं स्थि
तुमर्हतिः प्रलययेन जातवेद स्याइदं जातवेदसेचीय सुनवाम सोममिति प्रसवायाभिषवाय सोमं
राजानममृतमरातीयतो यज्ञार्थमनिष्टानि दहाति निश्चयेन दहति भस्मीकरोति सो मोद दहि
त्यर्थः सनपर्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिंधुं नावा सिंधुं यथा यः कश्चि
त्कर्णधारो नावा सिंधुं स्पंदमानानां नदीजलं दुर्गमाराकुलां तारयति दुरितात्यग्निरिति दुरितानि
तारयति तस्यैषापराभवति।२८। स्वस्तिरिद्धि प्रपथ्ये श्रेष्ठा रेक्णस्वत्यभियावामर्मेति सा नो अमा
सो अरणे निपातु स्वावेशा भवतु देवगोपा। स्वस्तिरेवहि प्रपथे श्रेष्ठा रेक्णस्वती धनवत्यभ्येति या

९ वसूनिवननीयानिसानोमागृहेसानिरमणोसानिगमनेपातुसावेशान्नवतुदेवीगोप्त्रीदेवानांगोपाया
स्त्वितिदेवाएनांगोपायस्त्वितिवोषाआख्याताततस्याएवन्नवति ।२८। हिंकारएवतीवसुपत्नीवसूनांवत्समिच्छति
मनसाभ्यागात् ।दुहामश्विभ्यांपयोअघ्न्येयंसावर्द्धतांमहतेसौभगायाइतिसानिगदआख्यातापथ्या
स्वस्तिपथ्यंतरिक्षंनिवासात्रस्याएषान्नवति ।३०। इमारुद्रायस्थिरधन्विनेगिरः ।क्षिप्रेषवेदेवा
यस्वधाव्ने ।अषाढायसहमानायवेधसेतिग्मायुधायभरताशृणोतुनः ।इमारुद्रायदृढधन्वनेगि १८
रःक्षिप्रेषवेदेवायान्नतेषाढायान्येसहमामानायविधात्रेतिग्मायुधायभरताशृणोतुनस्तिग्मंतेज
सेरुत्साहकर्मणआयुधमायोधनात्तस्यैषापरान्नवति ।३१। अग्रद्धारिंदुप्रस्थितेमाहवीषिचनोद

धिस्वपचतोत्तसोमं। अग्नीत्स्थितानि मा हवींषि च नो दङ्क्ष्व पचत उ सेन नाम पचन्ति नो मिमूताः। तंमेदस्त
प्रतिपचताग्रभीशानि त्यपि निगमो भवत्यपि वा मेदसः स्वप शोस्व सालद्धि वचनं स्यात्। यत्र त्यक वचनार्थी
प्रसिद्धं तद्भवति। पुरोळाशं गे पचत इति यथा। पुरुध प्रापो भवं तु। पुरुचं संरुधं ति। सनत्य हि पुरुधः संति
पूर्वीरित्यपि निगमो भवा। समिनोत मात्रो महान्भवत्यस्य मितो वा। अमिनः सहोभिरित्यपि निगमो भव
ति। जज्झतीरापो भवंति शब्दकारिण्यः। मरुतो जज्झतीरिवेत्यपि निगमो भवत्य प्रतिष्कुतो प्रतिषतो प्रति
स्वलितो वा। अप्रतिष्कुतमित्यप्रतिष्कुत इत्यपि निगमो भवति शाशदानः शाशद्यमानः। प्रस्वमतिमतिस्त्राशाशदा
न इत्यपि निगमो भवति। ऽ। सप्तऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादं। सप्त यः स्वपतो लो

कमीयुस्तत्रजाग्रतो अस्वप्नजौ सत्रसदौ च देवौ ॥१॥ सप्त ऋषयः प्रतिहिताः शरीरे रश्मय आदित्ये सप्त रक्षंति सद
10 मप्रमादं संवत्सरमप्रमाद्यंतः सप्तापनास्त एव स्वपतो लोकमस्तमितमादित्यं यंत्यजाग्रतो अस्वप्नजौ स
त्रसदौ च देवौ वाय्वादित्यावधिदैवतमथाध्यात्मं सप्त ऋषयः प्रतिहिताः शरीरे षडिंद्रियाणि विद्या
सप्तम्यात्मानि सप्त रक्षंति सदमप्रमादं शरीरमप्रमाद्यंति सप्तापना। नीमान्येव स्वपतो लोकमस्तमि
तमात्मानं यस्तत्र जाग्रतो अस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्च सात्मगतिमाचष्टे तेषा। १
मेषापराभवति ॥३॥ सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा। त्रिनाभि चक्रमेकचारिणं
चकतेवीचम्र तेवीक्रामते वै को अश्वो वहति सप्तनामादित्यः सप्तास्य रश्मयो रसानभिसन्नामयं

ति समेनमृषय स्तुवंतीति वेदमपीनर्गुन्नामैतस्मादेवाग्निसन्ना(मा)~~(ग्नीध्रो ग्रस्यं तेस्मिन्न सावर्षा)~~ संवत्सरः
संवसंतेस्मिन्भूतानिग्नीध्रो ग्रस्यं तेस्मिन्न सावव र्षा वर्षमासु पर्जन्योहेमंतो हिमवा हिमं पुनर्हंतेवीहिनो
ेवी जरमृजरणधर्माणामनर्वमप्रस्तमन्वस्मिन्मत्रेमानिसर्वाणिभूतानि निविसंतिष्टंते तं संवत्सरं सर्वमा
त्रेभिस्तौति पंचारे चक्रे परिवर्त्तमान इति पंचर्त्तुतायाः पंचवर्त्तेषः संवत्सरस्येति च ब्राह्मणं हेमंतशिशिर
समासेन षड्र ऋाहुरर्पितमिति शाल्लर्तुतायाश्चराः प्रस्ततानाभौषद्दुनः स्रहते।। द्वादशारं नहितज्जराय।
द्वादशप्रधयश्चक्रमेकमिति मासानामासमानात्र्याद्धिः प्रहितो भवंति। तस्मिंत्साकं त्रिशताना शंकवोर्पिताः
षष्टिर्निचलाचलास षष्टिश्च सहैत्रीणि च शतानि संवत्सरस्याहोरात्रा इति ब्राह्मणं समासेना। सप्तशतानि

विंशतिश्चातस्थुः। सप्त च वैशतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन विभागेन॥ ४॥ स च स्वा
नः स्वस्तये सेवस्व नः स्वस्तये। स्वस्ती स्वविनाशनामास्तिरभिपूजितः सु अस्तीति ऽयं सन्तेरेजत इति ऽभयवेपनयोः
यस्य शुष्मा रोदसी अभ्यसेतां। रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमो भवतः। द्यावापृथिवीनामधेयान्युत्त
राणि चतुर्विंशतिस्तयोरेषा भवति॥ ५॥ कतरा पूर्वा। कतरापरायोः कथा जाते कवयः को विवेद। विश्वं त्म
ना बिभृतो नाम वि वर्त्तेते अहनी चक्रियेतः कतरा पूर्वा कतरापरैनयोः कथं जाते कवयः क एने विजाना ११
ति सर्वमात्मना बिभृतो यद्धैनयोः कर्म वि वर्त्तेते चैनयोरहनी अहोरात्रे च चक्रयुक्ते एवेति द्यावापृथिव्यो म
हिमानमाचष्ट आचष्टे॥ ६॥ ॥ इत्याशीर्वादः॥ ॥श्रीसीतारामचंद्राभ्यां नमः॥ श्रीहनुमते नमः॥